ति योगविभागाभ्युपगमस्यैकदेशिमतत्वात् सा यादार्द्धधातुकग्रहणमार्द्धधातुकत्वेन धातुलोपनिमित्तपरिग्रहार्थमिति दृष्टांतः सूपपन्नः

तौ म्य ये सा

सुधे ते न्या. पर

॥६०॥

अत एव श्विवैर्मनि निव लितोपे आस्ते माणमित्यलोपस्यार्धधातुकनिमित्तत्वाभावान्न धातुलोपार्द्धधातुके इति निषेधो न प्रवर्त्तते इति
भाष्ये उक्तं प्रत्ययावयवनिमित्ते लोपे प्रत्ययनिमित्तत्वं सिद्धे हैव प्रथमप्रत्ययग्रहणप्रत्युदाहरणे आग्नीयेत्यादौ प्रत्ययावयवलो
पे प्रत्ययलोपत्वोपपादनं दिङ्मात्रस्य लं इति बोध्यमिति ॥ उपाध्यायास्तु सति प्रत्यये यत्कार्यं दृष्टं तल्लुप्ते पि भवतीति कार्यातिदेशपक्षे
सूत्रार्थमुक्त्वा परिवीये सत्र सति प्रत्यये णो दीर्घो न तु गिति परिवीरित्यत्रापि दीर्घाणो भवतीति प्रतिरसमादधाते नलुमताङ्गस्येत्यत्र प्र
त्ययलोपे प्रत्ययलक्षणं स्यान्नुवृत्त्यात्तु मच्छाद्यैन प्रत्ययलोपे प्रत्ययनिमित्तं कार्यमांगमनांगं वा न भवत्यंगस्य संबंधि चेत्तिदि यथाश्रुत
सूत्रार्थे प्रत्यासत्तिलभ्यार्थंतः परिष्करोति लुप्तप्रत्यये परतो यदुक्तादीनां पदसंज्ञा भावतीति सुप्तिङन्तमिति पदसंज्ञायाः प्रकृतिप्रत्य
यसमुदायोपाधित्वेन निरुक्तोपाधित्वेन निरुक्तोपाधिकार्यत्वाभावान्निषेधाप्रवृत्तेरिति भावः भसंज्ञा च नेति तस्या निरुक्तोपाधि
कार्यत्वान्निषेधादिति भावः ननु राजपुरुष इत्यादौ प्रत्ययलोपे पदसंज्ञायां अप्रवृत्तौ निरुक्तोपाधिकार्यत्वाभावेन आह अंगसंज्ञावि
ति प्रत्ययसत्ताकाले लोपात्पूर्वं तिष्ठत्येवेति अंतरंगत्वादिति भावः ननु भसंज्ञाया मापि एतदविशिष्टं न चांतरंगानपीति न्यायेन
लुग्विधिः प्रबलितः अंगसंज्ञायामपि तुल्यत्वात् धर्मिप्रग्राहकर्माणादिरोधएव लुग्विधिः प्रबलो न चासावंगसंज्ञयेति चेन्नु भसंज्ञायापि
कृतत्वायः सः कार्यद्वारकत्वसौ उभाभ्यामविशिष्टः अथ ब्रूयात् कृतव्यूह परिभाषया लोपे प्रत्ययलक्षणनिषेधात् भसंज्ञायां पूर्वमेवाप्रवृत्ताव

स

स्ति तयालुक्तौ विरोधो न संज्ञा अंगसंज्ञायामपि तस्या लघ्वागसंज्ञाककार्योद्देश्यकत्वाभावेन निषेधाभावात् इति मतं तन्न तस्याः परिभाषायाभाष्यकृताकृ

त्वा ठरवोप्मानुत्तृ रित्यस्वरसमाष्युपन्यस्याह तत्कालेइति कृञ्चिदिति नन्वमतातस्मिन्निति वार्तिकन्यासानुसारिमतेनेदं इतीहास्वरसः तथाहि द्रुकि

न्नपो इति भाष्यात्संवृद्धिविषये प्रत्ययनिषेधानित्यत्वं अंगसंज्ञायामपि तत्रन्यासे कल्पनीयं इत्येकं गौरवं लिंग मिषसं विवृद्धौ सेत्यत्र ग

मेरिट् परस्मैपदेषु नवेच्छन्ति तुक्ष्यइत्येताभ्यामिरो विधिप्रतिषेधौ प्रत्ययलक्षणनिषेधाप्राप्त्यंतौ तत्र परस्मैपदेष्वित्यस्योपलक्षणता र

त्परस्मैपदोपलक्षितसार्वधातुकस्येरो विधिनिषेधश्च सूत्राभ्यां विधीयते इति भाष्यप्रदीपविवरणे कूमदिदर्शितदिशा गौरवांतरं ननु

मतांगस्येति यथाश्रुतसूत्रन्यासे पुनरंगसंज्ञायामंगोद्देश्यककार्यत्वाभावात् नास्तिविप्रतिषेधप्राप्तिरिति न किंचित् कल्पनीयं अंगासर

प्रमात स्य सार्वधातुकस्य विधौयोरिमाविधिप्रतिषेधयोरप्यंगोद्देश्यककार्यत्वाभावात् एव सिद्धिरिति नास्ति कल्पनांतराद्यकाशात् गौरवाभा

व इत्याह अंगसंज्ञाद्वारेति का[illegible]र्यकालपक्षे कि तिचेति सूत्रभाष्यरीत्या वाक्यथोद्देश्यपक्षे संज्ञासूत्राणां विधिप्रदेशागतत्वात् विधिसूत्राणां वा

कृ संज्ञाप्रदेशागतत्वात् एकवाक्यत्वादिति भावः एकवाक्यता च पदैकवाक्यतया वाक्यैकवाक्यतयो वेत्यन्यदेतत् नन्वंगसंज्ञासूत्रे प्रत्यय इति यदि यस्य

च भावे न भावलक्षणे इति सप्तमी स्यात् तदा सिद्धसाध्यसमभिव्याहारे सिद्धसाध्यायोपयुज्यते इति न्यायात् तस्या निमित्तसप्तमीत्वं न सेत्स्यद

स्ति तस्या औपश्लेषिकाधिकरणसप्तमीत्वात् सिद्धांतादत उक्तदत्तस्यापरनिमित्तता अनुपपन्नं अत आह नियमत परस्तु इति पूर्ववृत्तितयेति

एवं च प्रत्यय इत्यौपश्लेषिकसप्तम्यास्तस्मिन्निति परिभाषासंस्कृतायाः परसप्तमीत्वं परत्वस्य पूर्ववृद्धिनियामकत्वान्निमित्तसप्तमीत्वं चेति भा

॥६१॥

वः तथा चाचः परस्मिन्निमित्तिदेशे साक्षात् परंपरया वा परनिमित्तकत्वं ग्राह्यं न लुमतांगस्येति प्रत्ययलक्षणप्रतिषेधे पुनः प्रत्ययनिमित्तक
त्वं साक्षादेवेत्यत्र किं भवति अतः एव न लुमताङ्गस्य इति वार्त्तिकन्यासे तस्मिन्निति च रितार्थं तद्धि प्रत्ययलोपे प्रत्ययलक्षणं इति पूर्वसूत्रे ल
क्षणपदोपादानात् प्रत्ययनिमित्तकत्वलाभे साम र्थ्यात् साक्षात् प्रत्ययनिमित्तकत्वलाभार्थं विज्ञायते तत्समानपू लक्षणस्य न लुमताङ्गस्येति
सूत्रन्यासे पितथैवोचितमिति स्फुटमतएवेति अंगसंज्ञाद्वारोऽस्य परनिमित्तत्वं कत्वेन स्यान्न लुमताङ्गस्येत्यस्य साक्षात् प्रत्ययनिमित्तकार्य
तवप्रवृत्तेरेवेत्यर्थः॥ चर्करीति अत्र यन्निमित्तकं यदङ्गं प्रत्यासत्त्या तन्निमित्त[निमित्त]कत्वं दाभ्यामस्य यङ्वर्णस्य सोरदिस्तेना तं विधीय
तेतस्य साक्षात् प्रत्ययनिमित्तकत्वेन स्यान्न लुमताङ्गस्येति निषेधा[दि]ति भावः ननु प्रत्ययपरतो यस्यास्त्यत्वविधिस्तदङ्गं तदवयवा
भ्यासस्य ऋवर्णस्यादित्वेऽपि रदित्वस्यार्थतः तस्य चर्करीत्यत्र सत्त्वेऽपि यङ्लुकमादौ यन्न लुमताङ्गस्येति प्रतिषेधे तन्निमित्ताङ्गसंज्ञा माद्याया
स्य प्रवृत्तिरूपेऽस्य तेऽस्य स्वरसादाहाज चाररतीति अत्र नित्यत्वात् रङ्गताभ्यां हलन्त्यादिलोपोऽथ लिधि सालस्य पलक्षणप्रवृत्तौ तन्नि
मित्तोरदत्तानापत्तिः स्थानिवत्त्वलक्षणधर्ममात्राश्रयणे नाल्विधाविति निषेधप्रवृत्तौ रभ्युपगमादिति भावः स्थान्यलसाधीरणधर्माश्र
यत्त एव तन्निषेधप्रवृत्तेः परिभाषाप्रदीपाच्चिषियव्यवस्थापितत्वाच्चिंत्यमेतत् नन्वचिश्नित्या रो अजादौ प्रत्यये [अ]र्थो नोपपद्यते। र
अंगसंज्ञाद्वारावाक्यैकवाक्यतया प्रत्ययस्य तन्निमित्तेऽभावेऽपि पदोक्तवाक्यतयाऽचिरस्य प्रत्ययविशेषणत्वाभावात् तदादिविध्यभावात्॥

याम
६१

ची

किंतु प्रत्यये यस्मात्प्रत्ययविधिस्तदादि अंगं भवतीति तस्य चरितार्थत्वात् तेस्यां यत्त्वं च केनैतदित्यर्थः प्रदर्शनीयो तमाह अचिरितार्थत्वादिति विधिप्रदे
शोपस्थितसंज्ञया विधिवाक्यं पदैकवाक्यतयेत्यन्वयः प्रत्यये यस्मात्प्रत्ययविधिस्तदादेरंगस्य योभ्यासस्तस्योरखादि रूपेण सूत्रार्थ य
थ्यपगच्छत्यां दीक्षितप्रभृतीनां मते ष्वदं आकडारादधिकारस्थ स्थितिकार्य कालस्याभावाच्चेति किंतु तत्र यथोद्देशपक्षस्तत्स्वरूपं च प्रगृ
गृह्यसंज्ञाप्रकरणस्थ प्रदीपदर्शितदिशा यत्र संज्ञाशास्त्रोपदेशस्तत्रैव वाक्यार्थबोधेन गृहीतपदशक्तिग्रहो लोपमविष्यति किंचिदनेन प्र
योजनमिति यथाश्रुतमाहि प्रतिपत्तुः सर्वत्र शास्त्रेष्वव्यवहारप्रयोजकत्वमिति नास्ति पदैकवाक्यतायाः संभव इति भावः किंतिचेतिसूत्रस्थ
प्रदीपदर्शितदिशा यथोद्देशपक्षे संज्ञाप्रदेशगतानां विधिसूत्राणां एकवाक्यता इत्यभ्युपगमे तु तत्रैवाकेकवाक्यतायाः संज्ञाप्रकरणे सि
द्धांतितत्वात् उरदित्यादौ नास्ति साक्षात्प्रत्ययस्य निमित्तत्वमेवेह सारं स्वमोर्नपुंसकादिति सूत्र इति बहुव्रीहिः स्वमोर्नपुंसकादिति सूत्रं यस्मिं
स्तस्मिन् सामान्ये पादेनेतारात्पुरदसीति सूत्रेदृत्यर्थः शिशीनुमादिभिरिति आदिना लुक् वार्तिकेनेति नपुंसकादेशैर्भ्यो युष्मदस्मदोर्वि
भक्त्यादेशा विप्रतिषेधेनेति गौणे किंनेत्यर्थः तद्वाच्येण चेति नपुंसकादेशानां अवकाशः त्रपुत्रपुणीत्रपूणि युष्मदस्मदोर्विभक्त्यादेशाना
अवकाशः त्वं ब्राह्मणो अहं ब्राह्मणः युवां ब्राह्मणौ आवां ब्राह्मणौ यूयं ब्राह्मणा वयं ब्राह्मणा इहोभयं प्राप्नोति त्वं ब्राह्मणकुलमहं ब्राह्मण
कुलं युवां ब्राह्मणकुले आवां ब्राह्मणकुले यूयं ब्राह्मणकुलानि वयं ब्राह्मणकुलानि युष्मदस्मदोर्विभक्त्यादेशा भवंति विप्रतिषेधेन।
अप्येदानीं युष्मदस्मदोर्विभक्त्यादेशेषु कृतेषु पुनःप्रसंगविज्ञानात् छिशीलुक्नुम्विधयः कस्मान्न भवंतीति सकृद्गतौ विप्रतिषेधेन यद्बाधि

स्य एव दि स्थे च स्म

(णेतुमस्यापूर्वविप्रतिषेधेन नुमो) णेतुमस्ति पूर्वविप्रतिषेधात्तस्य विभक्त्यादेशेन ६— (८प्रकृतेरिंगतस्याभावाच्चे) २

नंत द्वाधितमेवेति भाष्ये णत्वेत्यर्थः अत्र वार्तिके भाष्ये च विभक्त्यादेशात् [illegible] नामे रोच्यते स्थानि ये दमा[illegible]श्रिय लुवहुवचनमिति वोध्यं अ
त्राभिनव विवरणं भाष्ये शिशीलुगुविध परत्वेव पाठः [illegible] नुम् घटितः पाठस्तु [illegible] अमः सर्वनामस्थान त्वाभावादिति अत्र
मः शिना विप्रतिषेधे तुल्यबलत्वे लो[illegible]प पादना य भाष्ये नुमुपद्यतेति तेथा हि यदि नुमो विप्रतिषेधेन स्यात् तदा ब्राह्मणकुलानी त्यादौ
विभक्त्यादेशं बाधित्वा नित्यत्वाच्छिः स्यात् न च न तस्मिन्नूहते विभक्त्यादेशोपि स्थानिवद्भावात् प्राप्नोतीति सोपि नित्यः अतदानीं नुमापरत्वात्
नस्य वाधनादनित्यत्वात् [illegible]
[illegible] वार्तिके नुमुग्रहं बाधनात् कृताकृतप्रसंगित्वाद्विभक्त्यादेशोपि नित्यः इति शिना सह तस्य तुल्यबललोपपत्तिः
अत एव बृहद्भूले वृहच्छे खरे च शिशीनुमादि पदघटितः पाठो दृश्यते इति सूक्ष्म दृशां विदांकुर्वन्तु उच्चारणार्थत्व शंका वारणायेति यथा न्यासे
सान्तत्व शंका या इव न स्य इति न्यासे उच्चारणार्थत्व शंका या अपि वारणस्य संभवात् उपलक्षणमेतत् आचारश्चि[illegible] नाभिप्याभित्रयाणामित्यत्रे स्थानिवद्भा
त्वादेशत्वापत्तेरित्याहुः प्रातिपदिक कार्ये विशिष्टग्रहणे कृतया परिभाषा प्रदीपार्थे विभि व्यवस्थापितेताभि[illegible] पर्यादो येरिति न्यायेन त्रादेशप्रव
त्ति कल्पनात् नान्यतो विधानत्वापत्तेः त्रयादेशविधानसामर्थ्यात् तत्राप्रवृत्तेरितीहतत्सं अभ्युच्चयं इति प्रथमोपात्तादविशेष इतरोपपत्ता
नमभ्युच्चयः इदं जाति पक्षे व्यक्ति पक्षे तु सतस्येति सूत्रे स्थाप्यतोरुपस्थितिसामर्थ्यात् लोनित्यादीनामरत्वस्य प्राप्तिरिति विशंका स्यात् अ

य वा णा त्रि या (या)

पदं

अलु

पि

तोभवंतामित्युपपत्तेः ऽभिसाशयो वक्तुं शक्यः अनभिधानादिति भुत्वयद्धन्यं तदन्यत्रोक्तं ईदृशोभ्य इति आदंतेभ्य इत्यर्थः क्विपोनभिधानं इति वस्तुतस्तु प्र
त्ययलक्षणसूत्रस्य नियमार्थत्वपक्षे क्विपोतरंगत्वादप्यत्र लोपे विधित्वाख्यलक्षणाभावात् ईत्व प्राप्तेरभावात् न तदर्थमीत्वं अवक्वारादावितिवार्त्तिक
मंतुपावनस्यादौ निष्पत्त्याभावार्थं वार्त्तिकमारब्धं अत एव भाष्यकृता पावनइत्यादौ ईनिपातसाधनेन तत्प्रत्याख्यातमेवं चारभ प्रत्याख्यानयोः
समफलैकत्वापादंतेभ्यः क्विनिपातानभिधानं कल्पनीयं न क्विपोपि तस्मात्क्विप्यपावद्धातप्रमाशब्दः क्विबंतो विजंतो वा ऽदंतो नानभिधानमर्हति प्रमाणा
भावादिति चिंत्यमेतत् । क्विबंतवातप्रमीशब्दस्येति मूलमूलेत्व प्रत्ययांतवातप्रमाशब्दाद्यम् क्विबंतात्कर्त्तरि क्विपू इत्यभिप्रायकं मित्याहुः इतिनदोषइतिप्रत्य
यलक्षणसूत्रस्य नियमार्थत्वपक्षे क्विप्यपि न दोष इति बोध्यं ॥ इत्येके इति अत्रपक्षे क्विबंतवातप्रमीशब्दस्येति मूलमूले मीञ्प्रकृतिकः क्विबंतवातप्रमीशब्द
स्येत्यप्यर्थो बोध्यः प्राधान्येन तद्बोधकत्वनिवेशो नमानमिति एवं सेन्यादिशब्दानामाचारक्विप्प्रकृतिकः कर्त्तृक्विबंतानां स्त्रियां इत्तौ तस्याऽच्छसोनः पुंसी
त्यादिनानत्वाद्यापत्तिस्तथा कुधादिस्त्रीलिंगशब्दानां उकारीत्यापृक्तावाडेनाभावाद्दानापत्तिः इस्त्रियामिति निषेधादिति चिंत्यमेतत् कार्यकालत्वाभा

श्र

वादिति ॥ कार्यकालपक्षेऽपि संज्ञाकार्याणां तत्प्रवृत्ति काले अर्थांतरोपसंक्रांतस्य लाभावात् संज्ञा न प्राप्नुयात् न त्वाकडारसूत्रस
संज्ञानां कार्यकालत्वं अस्तीति यथोद्देशपक्षे तरंगत्वाद्धविष्यति किंचिदने न प्रयोजनमिति शानमात्रेणार्थांतरोपसंक्रमात्पूर्वं संज्ञाप्रवर्त्तनेन चेत्सदृ यवस्त्रा
विषयात्सिद्धमिति यथोद्देशपक्षाभिप्रायमेवेति भावः अन्यथेति कार्यकालपक्षे कथं बाध्यबाधकभाव इति तत्पक्षे संज्ञानां विधिप्रदेशगतत्वेनैकदेश
स्थत्वात्परत्वाभावाद्बाध्यबाधकभावानापत्तिरिति भावः केचिदिति संज्ञपोः कार्यार्थं अन्यदेशागमनेपि न स्वदेशोच्यते व्यवहारे त्यागः व्यवहारार्थं तत्र देश

स्थत्वः

123

॥६३

बे

गतानां व्यस्तग्रहणमिति हारस्वरसः अत्र यद्वक्तव्यं तत्परिभाषाप्रदीपार्चिषि द्रष्टव्यं भाष्ये स्पष्टमिति संख्याव्ययपादे ऽपि ह्रस्वतो दामहायनान्ताच्चेत्यत्र संख्यादेरि
त्यनुवर्त्तते व्ययग्रहणं निवृत्तमिति भाष्योक्तेः समासनिर्दिष्टानामप्येकदेशानुवृत्तेर्भाष्यकृदभिप्रेतत्वादिति भावः ह्रस्वस्य गुण इति सूत्रे भा
ष्ये त्वभ्युपगम्यैवैकदेशानुवृत्त्यभावमंबार्थनद्योर्ह्रस्व इत्यनन्तरं ह्रस्वस्येति तदुत्तरन्यासस्य योगं विभज्यांबार्थनद्योर्गुणबाधनार्थं पुनर्ह्रस्वविधा
पगुण इति तृतीयसूत्रे ह्रस्वस्येत्यनुवर्त्तते इत्येवं परिहृतं वक्तुमशक्य इति अंबार्थनद्योर्गुण इति न्यासेनेत्यर्थः तत्र न्यासे हि ह्रस्वस्येति तदुत्तरन्या
सस्य जसि चेत्यत्रानुवृत्तौ क्लेशाभाव इति लाघवमपि भवति नन्वनःशब्दस्य नपुंसकत्वात् सोर्लुकि वृद्धिपरत्वाभावात् गुणो न प्राप्नोतीत्यत आह तस्ये
तिपक्षे इति नलुमतेति निषेधस्यानित्यत्वात्तदप्रवृत्तिपक्षे इत्यर्थः चिंत्यमेतत् अनित्यस्थले लक्ष्यैकचक्षुष्कताया आवश्यकत्वेनात्र न लुमतांगस्येत्य
स्याप्रवृत्तौ बीजाभावात् नदीसाहचर्यात् स्त्रीलिंगस्यैवांबार्थस्य ग्रहणाद् अनःशब्दे गुणप्राप्तेरभावाच्चेति मौनिश्रीकृष्णाः तत्रेदं वक्तव्यं तन्न एवाप
रितोषाद्युक्त्यंतरेण हर्षे इति गुणश्रुत्यै नूपरिभाषोपस्थितौ लिंग्यादीतिरदमपि चिंत्यं अंबार्थनद्योः क्रमात्संभवव्यभिचारयोरभावेनैव क्वचिदोपस्थि
तेरभावेन दोषाभावादिति मौनिश्रीकृष्णाः अयं ह्रस्व इति विधानसामर्थ्याल्लभ्यो ह्रस्वेति भाष्योक्त्या योगविभागलभ्यो वा ह्रस्व इत्यर्थः वृद्धिवारणायेति
न्यान्तरंगयोर्वृद्धौ बहिरंगस्यौत्वस्यासिद्धत्वादप्यरत्वाभावः नाजानन्तर्ये बहिष्ट्वप्रकॢप्तिरिति निषेधादिति भावः इति बोध्यमिति न चाद्विधानसाम
मर्थ्ये ङित्यमिनुड्बाधनार्थत्वात् एवं तु ह्रस्वनद्यापो नुडिति स्यात् अनन्तरं हे नैत्येवं ब्रूयादिति चिंत्यमेतदिति मौनिश्रीकृष्णं ... स्तत्रैषङ्चतुर्थ्यां

बां

बे स्य

राम
६३

श्वेत्याद्युत्तरसूत्रे षुनेत्स्यानुवृत्तिप्रसंगात् विधिप्रकरणसमाप्त्यनन्तरं तत्करणे तु श्रीग्रामण्योः शुद्रसीयतः श्छन्दसी सस्यापि तत्रानुवृत्तिप्रसं
गात् इति च किं चिरेतत् सर्वथा नवकाशत्वादिति न च वचनसामर्थ्यात् व्यवधाने प्रवृत्ता सावकाशा आपि ति वाच्यं समानफलकत्वाभावेपि
विरोधमात्रेण बाध्यबाधकत्वस्याश्रियपो भवति वातपेयस्य चतुश्चत्वारिंशत्पाश्रित्य चतुश्चत्वारिंशयोरिव दर्शनात् सामर्थ्यकल्पनात् प्राग्विरोध
मूलबाधकत्वेनानवकाशत्वान्निरिखाश्रयात् आगमादेशयोरपि तत्त्वसत्त्वादिति यथा प्यते इत्यादो हि नु क्रियते ऽ किं तर्हि द्विधा दीर्घाप्राप्ते विरो
धात् न गरीर्घ यो रिवान्यत्रापि सति विरोधे बाधकभावस्योक्तत्वादिति भावः अनवकाशत्वेन बाधतीति अ नवकाशत्वोपलक्षितेन विरोधेन
बाधत इत्यर्थः अतएवेति स्थानफलकत्वाभावे विरोधमात्रेणापि बाधकत्वादेवेत्यर्थः नगणो विसं अपवादत्वादिति ईचगणोरस्यत्र स्थानषष्ठीअ
भ्यासस्येति हलादिशेषेत्त्ववयवषष्ठी भ्यासस्येति हलादिशेषेत्त्ववयवषष्ठीति संस्कारभेदाद्वात् समानफलकत्वाभावात् सामान्यविशेषभावेपि गणोरीत्संसमा
नफलकत्वलक्षणापवादत्वाद्युक्तादिशेषं न बाधत इत्यर्थः किं तत्सन्नवकाशत्वादिति गणोरंसणकारस्येत् हलादिशेषेण लोपाप्राप्ते विरोधादित्य
र्थः तत्रदीर्घो इत्त रस्य कि ग्रहणात् तत्रापकाद भ्यासविकारेषु बाध्यबाधकभावानाश्रयणात् प्रथमं हलादिशेषे ऽ नंतरं गणोरीत्तेनाजीग
णदित्यस्य सिद्धिरित्यन्यदेतत् स्पष्टं चेदं गुणोभ्यरुत्तुयोरिति सूत्रे भाष्यप्रदीपे एतेनागामो ऽ भ्यासस्य संस्कारकत्वात् समानफलकत्वेनैव तयोर्बाध्य
बाधकभावः इत्यपास्तं उत्तरीत्येकत्र स्थानषष्ठ्यपेरत्रावयवषष्ठीति संस्कारभेदे समानफलकत्वांगीकारात् समानफलकत्वे न बाधस्थले

(margin: क, बाध्य, दि:, नि)

प्रवृत्तेनेतरेणनिमित्ताभावात्सामान्यस्याप्रवृत्तावपि विशेषस्यैवसामान्ये बाधे नैरन्तर्यविशेषेण सामान्यस्य तत्रापि विशेषे २

स्य

॥६४॥ बाधकप्रवृत्त्यनंतरमुत्सर्गप्रवृत्तेर्दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति कौण्डिन्यतक्रदानोत्तरं दधिदानादर्शनात् अनापत्तेरुक्तेः एवमुत्तरमाह प्रसंगात् विरोधमूलकबाध्यबाधकविषये तु यत्र सामान्यविशेषयोः परस्परं सामान्येन वा विशेषेण विरोधस्तत्र विशेषे प्रवृत्तेनैनिमित्तसंभवात्प्रवृत्तिः सामान्यस्य भवत्येव यथा मिसस्थाटः लोकेपः ब्राह्मणा भोज्यंतां माठरकौण्डिन्यौ परिवेविष्टामिति भोजनपरिवेषणयोर्विरोधेपि परिवेषणानंतरं माठरकौण्डिन्ययोर्भोजनं दर्शनानत्थे वप्युक्तत्वात् अतएव हयवरट् सूत्रे भाष्ये उक्तन्यायेउपन्यस्य नेदानीं तौ भुंजाते इति कालविशेष प्रदर्शनं कृतं अस्यापि रूपरिभाषाप्रदीपार्चिविविस्तरेणानिरूपितं तत्र एव द्रष्टव्यं शास्त्रीयोपसर्जनग्रहणेदिति लौकिकोपसर्जनग्रहणे यथा वचनं तेषु वंते वा न दोषस्तथा परिभाषाप्रदीपार्चिद्रष्टव्यः ननु रुचगमादीनामिति वार्तिकेन क्विपि अनुनासिकलोपे कृते चन्निष्पन्न भ्रूशब्दस्य धातुत्वादेव सिद्धे सूत्रे तदुपादानं व्यर्थं अत आह भ्रूशब्द इति समानाधिकरणं विशेषणमिति वैयधिकरण्येन तथात्वे तु गौरवं क्षिपती सादौ दोषापत्तिश्च वलिलोपेन तत्रेष सिद्धाव ... पि अयत्लुरित्यादौ अवल्परे दोषस्तु स्थैस्थ्यन्यायादुत्तरसूत्रे तथात्व पत्तौ दिदिवलुरित्यादौ यणापत्तिश्चेति भावः इत्थं तस्येत्यर्थं इति अंगाधिकारे तदंतविधौ रिष्टत्वादिति भावः यत्तु ग्रहणवतां प्रातिपदिकेन तदंतविधिप्रतिषेधात् भ्रूशब्दो तेनोवङ्क्रियते एवं च तत्र नेयङुवङ्स्थान इति नदीसंज्ञानिषेधाभावात् काशिहे सुभ्रु विमानितासु भ्रु पितुर्गेहे कृतइत्यादि महाकवि प्रयोगेषु नदीत्वाप्रयुक्तः संबुद्धिह्रस्वः सिध्यातीति ग्रहणवता प्रातिपदिकेनेति प्रतिषेधस्य प्रत्ययविधिविषयत्व सिद्धांतात् परिहृतः चगमादीनामिति वार्तिकेन निष्पन्न भ्रूशब्दस्य रुदिशत्वात्मध्युपगम्य वार्तिकमते प्रत्ययांत भ्रूशब्दस्यातिरिक्तस्याभावात् सूत्रे व्यर्थं भ्रूग्रहणं तदंते उवङ् प्रवृत्त्यभावे कस्यक्रियस्यते ॥ एवं तु

[illegible]

धासिद्धे सुभ्रुस्यादिसिद्धावपि गूढसूचितरहस्यविभेदेः सुभ्रुवां प्रवर्तते परिहासइत्यादिषूवङ् न स्यात् इत्युवङस्तस्य रुहिशब्दस्य [illegible] पगंतव्ये नाभ्रु
सुभ्रुत्रिप्रयोगेन स्वप्रमादस्य बहुसंमतत्वादित्याशयेनाह। इति सिद्धमिति वस्तुतस्तु भ्रूशब्दोपादानं भ्रूशब्दार्थप्राधान्ये एवोवङ् अनुपसर्जन
इत्यर्थसूचनार्थमिति धासिद्धे सुभ्रुस्यादि बहुव्रीहौ नदीत्वप्रयुक्तह्रस्वसिद्धिः सुभ्रुवां प्रवर्तते परिहासइत्यादौ उवङ् तु सुष्ठुभ्रमंति ताः सुभ्रुव
स्तासां इत्यर्थे उपसर्जनत्वाभावान्नानुपपन्न इत्याहुः स्पष्टार्थमिति यवक्रियाविस्यादौ धात्ववयवसंयोगभिन्नाद्रेफात् परत्वेनातिप्रसंगात्
धात्ववयवसंयोगात् परस्य नेति व्याख्याने उद्दियाविस्यादौ बाधात्ववयवसंयोगपूर्वभिन्न इत्यस्य स्पष्टलाभार्थमित्यर्थः वस्तुतस्तु धातोः सं
बंधिसंयोगभिन्नः पूर्वः पूर्वावयवो नंतरो यस्य कारस्येत्यर्थः सत्यभिधाने अनंतर्यसंबंधेपि समासस्योक्तत्वादिति यवक्रियौ इत्यादौ नाति
व्याप्तिः पूर्वग्रहणस्यार्थवत्वं चेत्याहुः इवर्ण विशेषणं यथा स्यादिति न चाधातुविशेषणे अतिप्रसंगाभावः संयोगभिन्नस्य धातोरिति गंगीय पूर्व
तेः क्विपुगगीः गंगियौ गंगियः इत्यादौ [illegible] णापत्तेः इति निषेधादिति एवं चल्व बंत कुमारीशब्दे पक्षे शाकल्यं भवत्येव परित्वबंतात्तद्धितोत्स
रिति स्याहुः प्रतिपदोक्तत्वादिति एवं च प्रतिपदोक्त ग ति समाससाहचर्येण कारकपूर्वपदे कारकसमासस्य कर्तृकरणइत्यस्यैव ग्रहणाद्दुष्टा न
धीर्येषां वृश्चिकात् भीरित्यर्थ दुर्धी वृश्चिक भी शब्दयोर्यण् न प्राप्नोतीति मूलस्मृत्तौ स्तत्समाधान प्रयासो व्यर्थ एवेति भावः अन योरेव निषे के
धइति एवं च निषेधस्य सुप्येव प्रवृत्तित्वात् सुधापास्येत्यादौ प्रवृत्तिर्नेति भावः प्रकारांतरमाह सुपीति वेति वलि लोप इष्यते लोपो व्योरि हलि
ति विधेयस्य प्रथमानिर्देशेन वेरपृक्त लोपात् वलि लोपस्य वलस्य ज्ञापनादिति भावः अत एव व्योर्लोपे क्वावुपसंख्यानमिति वार्तिकं संग
वलु

छ ते भाष्यकृता च लोपो व्योर्वलीत्यस्यानन्तरं चेरिति योगं विभज्य व्यलोपे योऽलोपेविधानादित्यत्र प्रत्याख्याय एतस्येति तृतीययोगे वेरित्य
नुवृत्त्या वेरपृक्तलोपः साधितः इत्याहुः गौणमुख्यन्यायश्चेति यदि तु परिभाषाप्रदीपार्चिष्मुक्तरीत्याभिव्यक्तपदार्था ये इति न्याय
स्य प्रातिपदिककार्येऽपि प्रवृत्तिरित्यभ्युपगम्यते तदा तृज्वति द्वाभ्यां विहितप्राप्तुतः सर्वनङ् सौर्यस्य तत्र सोऽर्हे तिवत्त्वेन ङ् विधान
मनभिव्यक्तार्थकत्वस्य त्युरपि सूत्रे ग्रहणार्थं अर्थाधिकारानुरोधात् इति द्वाभ्यामेव मित्याशयः कल्प्यः नच [illegible] उशनस्पुरुदंसोनेहसां चे
त्यत्रानुवृत्त्यर्थमनङ् विधाने स्यात् अविधाने उशनस्पुरुदं सोऽपि लोपे सर्वनामस्थाने चासंबुद्धाविति सांतमहतेति च दीर्घः स्या २
दिति वाच्यं अंगवृत्त परिभाषया समाधानात् यत्तु उशनसः संबुद्धावनङ् नलोपश्च वा वाच्य इति वृत्तौ [illegible] मानवचनार्थस्य ज्ञापकमि ष्य
ति तन्न । तस्य वचनस्य भाष्यादावनुपलंभादप्रामाणिकत्वस्य वक्ष्यमाणत्वादित्यलं ।। तृन्निति सूत्रस्थवार्तिके नेति ः तृन् विधावृत्विक्षु
चानुपसर्गस्यानिर्देशं चेत्सने नेत्यर्थः तत्रानुपसर्गस्येत्युक्त्या प्रशास्तृ प्रतिहर्तृ [illegible] ततृन् [illegible] भावार्थमुपादिष्टत्वात्सादनमावस्य
कृतदाह आदिग्रहणात् प्रशास्तृशब्दस्यैवेति अस्य [illegible] तृशब्दस्याधुत्वादनमप्राप्तेऽधिकमिति अनिर्देशस्य णि
त्वतः सिद्धत्वादिति भावः अनन्त्यैव अनृत्विज्यप्युद्गातृशब्दप्रयोगः प्राप्नोतीत्यत आह यंत्रेऽपि [illegible] योगरूढेयमिति ते मा [illegible] इति
औणादिकत्वनमेकं ततश्च प्राप्तस्य दीर्घाभावस्य भाष्यप्रयोगादभावकल्पनं द्वितीयं होतृपोतृनेष्टोद्गातार इति भाष्यप्रयोगात् त
न दीर्घेण ज्ञापकता न पि केवल उद्गातृशब्दे दीर्घाभावसाधनार्थं उपलक्षणता भाष्यप्रयोगस्य युक्तेति तृतीयमित्यनेक गौरवमस्त

ता२२ त्वात् एतस्य मतस्येति भावः अन्यप्रयोगस्येति होतृपोतृनेष्टोद्गातॄणामित्यस्येत्यर्थः नियमपक्षं चिंत्यमिति भाष्योक्तेः नियमेन मातृपि त्रादि
शब्दानां केवलतृप्रत्ययांतत्वलाभात् दीर्घप्राप्ते रभावादिति भावः प्रथमोपस्थितत्वात् अष्टाध्यायां प्रथमोपात्तत्वात् एतदुक्तेरवः । असि
न्निति स्यस्योल्लेखं विशेषविहितत्वात् नृनृचोः साक्षादुपादानेन दीर्घस्य विहितत्वात् शीघ्रोपस्थितिकत्वेनेति अंतरंगन्यायोन्नबाधा
कसेमूलमिति वक्ष्यते एवं अस्तृन्निति दीर्घ एव प्रयोगनियमार्थत्वमिति तृज्वदेव सर्वनामस्थाने ननु नंतस्येवं नियमेनेत्यर्थः प
रत्वमिति उपक्रमस्थ तृज्वत्सदबोधितप्रधानार्थस्यान्यत्र संबंधाभावबोधक नियमापेक्षया सर्वनामपदबोध्यनिमित्तस्याप्रधानस्यत्
नंत निरूपितत्वसंकोचकल्पने लाघवादीतिभावः इत्थं नियमस्येति तृतीयादौ च यो भयमित्येवं रूपस्येत्यर्थः वैय्यर्थ्यापत्तेरिति तथा च तृ
तीयादौ च यो भयमिति नियमात् अन्यत्र तु नंतस्यैव प्रयोगकल्पना ...ष्टु निरवकाशत्वासंगतिरिति भावः अन्यत्र तु नंतस्यैव प्रयोगकल्प
ने भाष्यप्रयोगविरोधमाशंक्य समाधत्ते नचेत्यादिना चित्सवर्णे ... तीर्घृदंतृष्णो घ्योरिच्चेति सूत्रे इच्च कस्यातकं रत्वमिति वार्त्तिकव्याख्यानपरकैय
टीये स्पष्टं कैयट इति यद्यपि ... प्रत्याहारः सवर्णान् गृह्णातीत्यर्थः तज्ज्ञापकतेति नोक्तं तथाप्युक्तार्थ एव तस्य तात्पर्यं सनाशंस
ष्पा भिक्ष उः न नारि कृत्यप्यु उरिति दीर्घ सवर्णाग्रहणास्येष्टत्वादिति भावः अत्राधिकं पद्धत्यं तत्परिभाषाप्रदीपार्चिष्युक्तं कर्मणा ... तिपतेन त्रिया पि
विशेषणानां कर्मत्वोक्तिस्तत्रोन्यत्रापि दृश्यते इति दृशि ग्रहणासिद्धौ ... लीयोपलक्षणं योगे षष्ठ्याः कर्मणि लकारस्य चतन्त्रादर्शनादिति पर
त्वं षष्ठीलकारविधौ कर्मग्रहणस्य कर्तृसाहचर्यात् धात्वर्थाभेदेनान्वयि कर्मबोधकत्वेन दोषोद्धारादिति परिभाषाप्रदीपार्चिषि विस्तरः स्वग्रा

मस्वाध्याययोः पाठेनेति द्वारादिषु स्वशब्दस्य केवलस्य पाठात् तदादिग्रहणस्य तत्र चोदितत्वात् नैव स्वग्राम स्वाध्याययोरप्यैचः सिद्धत्वात् तयोः पाठो
नियमार्थ इति भावः तत्र तदादिग्रहणे ज्ञापकं द्वारादिषु पठमानस्य श्वन् शब्दस्य श्वाभ [illegible] स्त्रि इति तदादौ प्राप्त्यभावात् श्वादेरिञीति सूत्रे इत्याहुरिति
अनुकरणाद [illegible] विभक्तेरप्राप्तिस्तन्मात्रपरिष्कारस्तु इउण् इत्यत्र सूत्रव्याख्यायां दर्शितः [illegible] मानेऽस्मिन्निति चिंतार्थं तंतु सूत्रमते ऋकार ऌकारयोः सा
वर्ण्याभावात् ऌकारस्य ऌकारे उस्थाने ऽणोऽभ्रौ [illegible] परत्वाप्राप्तिरित्यभिप्रेत्य पूर्वेणाण्ग्रहणे णकारानुबंधस्य ज्ञापकत्वं भाष्यकृतोक्तं वार्तिककृन्म
तेन् हलोयमां यमि [illegible] ति लोपस्यानित्यत्वावश्यकत्वात् सत्यपि ऌकारस्य ऌपरत्वे लोपेन दोषाभाव इति ज्ञापकत्वं [illegible] पन्नं भाष्योक्तात्र विकल्पानुवृत्ति
स्तु सूत्रकृन्मताभिप्रायेणैव तत्र ज्ञापस्याण्दित्यत्र णकारानुबंधस्याण्ग्रहणप्रत्याख्यानवादिवार्तिककृन्मते ऽभावात् तथाच नास्ति [illegible] त्र
वार्तिकं। अच् [illegible] प्रतिषेधे शाकारप्रतिषेधो [illegible] दिति परत्वाज्ञातानीत्यत्र पारस्करादित्वात् सुट् श्चुत्व द्विर्वचनयोर्झरो झरीति लोपाभावार्थ
तद्विकल्पानुवृत्तावनर्थकं भवेत् तदेतदभिप्रेत्य हयवरट् सूत्रे संतसंदिग्धमाचार्याणां वर्त्तते विभाषानवेतीति भाष्यमित्याहुः अन्ये तु विकल्पा
नुवृत्तौ अ [illegible] परस्परत्व [illegible] णकारोपादानस्य पूर्वेणाण्ग्रहणज्ञापकत्वस्य परिभाषाव्यवस्थितत्वे [illegible] संकल्पपि लोके प्रयोगेषु विरोधमाहुः उत्त
रपद [illegible] स्येति यद्यपि परादिवद्भावेन [illegible] काराश्मात्र पुनरपदंतस्य चकारापित्वं पूर्वरूपविधावस्ति तथाप्यपदादिविधौ इति पर्युदासात् प्रतिषेधो न
प्राप्नोति पूर्वांतवद्भावात्तु पदत्वे आश्रीयमाणे प्रतिषेधउक्तः पुनः प्रवर्तत इत्याहुः सूत्रे तपरकरणेनेति तद्विचित्रगुरित्यत्र णित्वाभावार्थं कृतं।
तपरसूत्रे तात्पर्णित्वानुवृत्त्या गोः इति समुदायस्यानणः स्वमकालग्राहकत्वाभावात् व्यर्थमस्याविवक्षायां तात्पर्यमाहुः तं संपद्यत इति भावः॥

राम
६६

स्यमंडूकानुवृत्तसाद्दीर्घान्तादेशाद्यादिनिर्व्याख्याना अगोधूमिति · भाष्यवार्तिक·

इत्याद्युरिति अपरे तु गोतः इति तपकालस्य णित्सार्थं करणादेव गोः पूर्वणित्सावेति वार्त्तिके णित्त्वे प्रतिषेधाः प्रत्याख्यातः स्था निवत्सूत्रे भाष्ये तत्सार्थाभावः तत्परसूत्रेण ग्रहणान्ननुवृत्ति गोरित्येतैः समकालस्य णित्सार्थं तपरकरणं इति चित्रगुरित्यत्र दोषाभावः हे चित्रगो चित्रगवइत्येषुगुणे कृते प्राप्ति संभवेपि लाक्षणिकत्वेन समकालिकस्याग्रहणाद्दोष इति एवं स्थिते हे चित्रगो अग्ग इति पूर्वरूपस्यापि प्रतिषेधः प्रत्याख्येयः लाक्षणिके इत्यगोशब्दे नदोषाभावात् नवर्णग्रहणेष्विति निषेधस्य वर्णप्राधान्यविषयत्वात् ओत्वे प्योतोम् इत्यत्रौरिति न्यासे प्रतिषेधेन न प्रयोजनं नगोश्च नित्यत्वाच्च नो दीर्घाद्दीर्घादित्ये न्यासे च तपरत्वात् बहुगुमानित्यत्र स्वरोपि प्रतिषेधं न प्रयोजनं पतिन [illegible]

तो हेशत्वादिति व्याख्याना चित्रगूणामित्यत्र सत्यपि दीर्घान्तत्वे लाक्षणिकत्वादिति गोः पूर्वणित्सासस्वरेषु प्रतिषेधो वक्तव्यः इत्यस्य व्याख्येय इत्यर्थः न चैवं गामित्यत्र परविप्रतिषेधात् वृद्धिः प्राप्नोति पूर्वविप्रतिषेधे नास्येव वाधकत्वात् अंगोतः इति भाष्यवार्तिकस्यानैवकल्पने लाघवात् द्योरिति सूत्रे तु न प्रयोजनं हे द्यौः सुद्योरित्यादीनां दिव औत् इत्येन सिद्धत्वात् द्यौर्वा इत्येतेनात्तमिति भाष्योदाहृतप्रयोगेषु वृद्धिः छा देव्य स्यपनेत्याद्युः इत्याद्युरिति अस्मिन् प्रक्षे भाष्यं उपलक्षणम् तथा न व्याख्येयं नापि स्वरितो वेति सूत्रस्थभाष्यतात्पर्ये संकोच इति भावः इत्यन्ताः पुल्लिंगाः स्त्रीविधावावंततास्तातिदेशस्य प्रयोजनाभावेपि तुल्यन्यायास्या उ दिविधावंतद्भावस्येव वक्तव्यतया तद्वावंततातिदेशस्यास्ति प्रयोजनमिति शंकेते न चैवमिति उत्तरपदस्य गुणवाचकत्वादिति उत्तरा प्रकारकत्वानविशेष्यस्य लक्षणया बोधकत्वादित्यर्थः पूर्वपदे तु नातथात्वं तच्छब्दसामानाधिकरण्ये विधेयबोधकत्वान्नविधौ परः शब्दार्थ इति न्यायो न तत्र लक्षणाया अयोगात् अयमपि बहुव्रीहेरन्यप

सानन्दं धा वि नि निषेधात् अगोत इति भाष्य वार्त्तिक न्यासे च तपरत्वात्

Margin (left): नौ ओत् ने दि सत्तात्

Margin (right): न्न तपरत्वात्

|3|

॥६७॥

दार्थप्रधानत्वाद्वृत्तिपदार्थानुवादेनान्यपदार्थसंबंधिन्यविधिस्ततः प्रतीयते तथाप्यनुवाद्यस्योद्देश्यविधेयभावेनैव विवक्षितत्वादेव मुच्य

ते तत्रापि यदा तात्त्विकवस्तुविवर्तनिराकरणे नास्तितात्त्विकवस्तुव्यवस्थितिरनूद्यते यत्कुंडलं तत्सुवर्णं समेतत् संबंधीतिवत् तदा यथो

विधे क्तउद्देश्यविधेयभावः यदा तु वस्तुतत्त्वं अपश्यतो भ्रांत्या कोपरोपेण मिथ्याज्ञानमनूद्यते यत्सुवर्णं तत्कुंडलमेतत् संबंधीतिवत् तदा

पोजराप्रसिद्धापूर्वसंस्कारकज्ञानविशेष्याभासस्यैवं विपरीत उद्देश्य विधेयभावः न विधौ परः शब्दार्थ इति न्यायस्तु नैवं सति प्रवर्त

ते आरोपस्यैवेह विधेयत्वादत एव यापूर्वा सोत्तरा यस्या उन्मुग्धया स्तस्या युत्तरपूर्वा ये इत्युद्देश्यविधेयभावे परीक्ष्य नविग्रहं प्रदर्शयतां

प्रकाश कृतां मतखंडनप्रवृत्तेमनोरमायां धस्य पूर्वनिपातत्वे परीक्षायते त्रिरेवं रूपव्याख्यानावसरभ्रमाधिष्ठानबोधकपदपूर्वनि

पातस्यायुक्तत्वादिति हेतूपन्यासपूर्वकं भ्रांतीरिततं यस्य दुर्निरजनको देवत्ते दूष्यपतत एवसंगच्छते इत्युन्नीह शिदिक्षितो रिखाह ॥

ण्णी अत्र वदंति लोहितोष्णीषा ऋत्विजः प्रचरंतीत्यादौ विधेयबोधकस्य विशेषणलोहितपदस्य पूर्वनिपातदर्शनात् इहापि

वि तत्त्वाद्वयोगिपिधेयबोधकपदस्यैवन्याय्यः पूर्वनिपातः विपतो ह्युद्देश्यविधेयभावेन विग्रहं प्रदर्शयतां प्रकाशकृतां तात्पर्यं अप्य  ३८

पूर्वा त्रैवेति तर्हि यां सोत्तरा स्यो न्मुग्धस्य सपूर्वोत्तर उन्मुग्धः इत्युद्देश्यविधेयभावानुगतपूर्वनिपातो भाष्यरत्नाकरमुदाहृत इति चेन्नु या

ए४ पूर्वा सैवोत्तरा स्येवमेवकारार्थात रभावेतेति तत्र ब्रूमः पश्चाद्दसमभिव्याहृतपूर्वापदस्य पूर्वोक्तप्रकारकज्ञानविशेष्यरूपं ॥

राम
६७

श्री

विशेषणपरस्यैव तत्पुरुषसामानाधिकरण्यस्यानुविधेयपरत्वात् विशेषणसंगततद्वत्त्वैवकारेणायोगव्यवच्छेदकेन इ जरस्यां । पूर्वत्वमित्र धर्मप्रका रकज्ञानविशेष्यत्वस्यवृत्त्य । विधेयता बोधनादिति दिक् । नन्वेतरां या पुरि वसतीति भोष्यादाहरणात्सुः शब्दसामानाधिकरण्यं ए शापुरीति निबधे न भाव्यमितो नरां ये नगर्यौ इत्युदाहरणासंगतिरत आह । पूः शब्दार्थस्य विशेष्यत्वेऽपीति । एवं चेति । जरसिकृते स्थानिवद्भावेनेत्यादीनां प्राप्तौ चेत्यर्थः । नित्य त्वादिति । अतः शिखेत्यादीनां कृतोऽकृतप्रसंगादित्यर्थः । क्वचिदनेदिताभावात् नुडागमः । कचित्सन्निपातपरिभाषया दूषयामः । एतद्विषये तु न सन्निपातप रिभाषया जरसोऽनापत्तिः । एतस्य सन्निपातलक्षणत्वेऽपि सन्निपातविघातकस्य जरसो निमित्तत्वाभावात् किं तु कृते यदि जरस्यादेश प्रवृत्तिरनर्थि कास्यादत इति जरसः न प्रवर्तेत । थापि प्रवर्ततेऽवमपुभयोर्नित्यत्वात् परत्वादेशेऽकृते तस्य इति न्यायात् जरसः न प्रवर्तेत रत्याशयः एतदेवाभिप्रेत्य परापि इत्याघुत्तरग्रंथे यागमावपेक्ष्येत्यस्य पृथगुक्तिरेवमेत्यपीति । विप्रतिषेधपरत्वादित्विति हेतोः समानत्वेऽपि जरसः प्राप्तिहेतोर्विशेषात् ननु आकारप्रश्लेषसत्त्वेऽपि नु इत्याघुत्तरग्रंथे यागमावपेक्ष्येत्यस्य पृथगुक्तिरेवमेत्यपीति । तत्र परत्वाज्जरसि कृते इस्याकारप्रश्लेषस्य प्रयोजनं एतयाऽत्र मानुपरत्वाज्जरसि कृतेऽकेशीया जरस्यप्रा दोरपरिशिष्टेत प्रापस्य भावात् जरीसइव तयोरप्यनित्यत्वं । तत्र परत्वाज्जरसि कृते इस्याकारप्रश्लेषस्य प्रयोजनं एतयाऽत्र मानुपरत्वात्प्रवृत्तोऽक्तेशीया जरस्य प्रा प्तोऽतिरस्य त्र प्रश्लेषो व्यर्थ इत्याक्षिपति यद्यपीत्यादिना परत्वात्कृते इत्यर्थः जरसं प्राप्तिस्तु सकृद्गताविति न्यायादिति प्रागुक्तं पुनः प्रसंगविज्ञानं तु एतादृशे विषये नास्तीत्यर्थ इत्यन्नप्रदीपस्यार्थं तत्रेति । एतपाठमूलग्रन्थेषु एवमितीति परन्निति सन्नेशस्य प्रभृति इष्टिस्य विषयसमवीलाभ्युपगमात्परन्नि त्यां श्लेषादीनां बाधितांतरंगत्वान्नसादिषु कृतेषु स्थानिवत्त्वामात्रत्वादयुक्त आकारप्रश्लेषानुभवतीति भावं इत्यादेशिति अदिनानिष्पन्नशब्दे निर्देशो वीरिया रि त्यां श्लेषादीनां बाधितांतरंगत्वान्नसादिषु कृतेषु स्थानिवत्त्वामात्रत्वादयुक्त आकारप्रश्लेषानुभवतीति वचनस्यैव भाष्ये पाठादिति परिभाषावृत्तिकारास्तु देः संग्रहः वक्ष्यमाणरीत्येति वक्ष्यमाणापरेतु मतप्रस्तावे किंचाकारप्रश्लेषे पक्षेपीत्यादिग्रन्थेत्यर्थः वचनस्यैव भाष्ये पाठादिति परिभाषावृत्तिकारास्तु देः संग्रहः वक्ष्यमाणरीत्येति वक्ष्यमाणापरेतु मतप्रस्तावे किंचाकारप्रश्लेषे पक्षेपीत्याद्युक्तरीत्येत्यर्थः वचनस्यैव भाष्ये पाठादिति परिभाषावृत्तिकारास्तु देः संग्रहः वक्ष्यमाणरीत्येति वक्ष्यमाणापरे तु मतप्रस्तावे किंचाकारप्रश्लेषे पक्षेपीत्याद्युक्तरीत्येत्यर्थः योगविभागे नेयडु प्रत्ययग्रहणे यस्मात्सविहितस्तदादेस्तदन्तस्य ग्रहणमिति परिभाषायां तदाद्यंशप्राप्याहः केयस्मात्प्रत्ययविधिस्तदादीसंगसंज्ञासूत्रीययोगविभागेनेयडु वत्ति स्यतोऽस्त्रीत्यनुवर्त्यदन्ताधिकाराश्रयणे नार्थपरत्वं सपाद्य स्त्रीप्रत्यय इत्यर्थे यूस्त्र्याख्यावित्यतः स्त्र्याख्येत्यनुवर्त्यते न स्त्रीप्रत्ययस्य विशेषणात्प्रधान त्वे

स्न

री

रि

त्ये

स्त्रीप्रत्ययस्सर्वथैव भिन्नप्रत्ययग्रहणे यस्मात्प्रत्ययविधिस्तदादेर्ग्रहणं भवतीत्यर्थात् इयं लभ्येत्याहुः गोस्त्रियोरिति सूत्रभाष्यात्तु परिभाषायां स्त्रीप्रत्ययनिषेधणा
थमनुपसर्जनस्प्रायोवादः इति लभ्यते तदानुपरिभाषार्थसंग्राहके यस्मात्प्रत्ययविधिस्तदादि प्रत्यये ग्रहणे इति योगविभागेनेयङुवङ्स्थानेः स्त्रीग्रहणं वा मास्त्वतो व्यवस्थित
विभाषार्थकं वा ग्रहणमनुवर्तनीयं न तु स्त्र्याख्यपदमपीति पूर्वोक्तार्थसिद्धिरनुगन्तव्या ॥ स्यधिकसुभि परिभाषा प्रदीपार्चिषि द्रष्टव्य ॥ एवं द्युपामद्वे द्व खट्वाया
मिति । विग्रहप्रदर्शनमेकदेशी समासारम्भपक्षे दोषसद्भावसूचनार्थं चिंत्यमेतत् सूत्रमते एकदेशिसमासारम्भादुपसर्जनत्वसद्भावेऽपि परिभाषाप्रदीपा
र्चिः परिष्कृत गोस्त्रियोरिति सूत्रस्थभाष्यप्रदीपोक्तदिशा हल्ङ्याब्भ्य इति सूत्रस्थदीर्घग्रहणात् परिभाषायामनुपसर्जन इति अंशस्य वैयर्थ्यस्य प्रायोवादत्वा
भ्युपगमात्तदादिनियमाभावात् ॥ अर्द्धखट्वायामित्यत्र दोषाभावात् भाष्यमते त्वेकदेशिसमासस्य कर्मधारयमात्रविषयत्वप्रत्याख्यानात् उपसर्जनत्वाभावेन
दोषशंकाया अपि अभावादिति इत्याहुरिति यत्तु भाष्ये नाविघोषणादिषु च भ्राडिति स्त्रालभ्यतः पठितस्तस्य फले विभ्राडिति सिद्धेरत्र भ्राजिग्रहणं व्यर्थमि
ति तन्न भ्राजिग्रहणस्यामर्थ्यात् तत्र्यनुविघोषणादिषु चदेस्यात् तत्पाठनिर्णयस्याचार्यवैमत्ये प्रक्रियाकौमुदीकारयोः संमतत्वात् परिभाषाप्रदीपार्चिषि व्यवस्थापितत्वात् । निषेध
विकल्पत्वमसंभवीति । निषेध्यविकल्पत्वमेवेति नियमासंभवप्रदर्शनपरमेतत् । अर्थान्तरोपसंक्रमाभावे निषेध्यविकल्पत्वस्याश्रयेऽपि यद्वा दोषसंभवात् । एवं चास्य नेयेति नि
षेधांशमादाय प्राप्ताप्राप्तविभाषात्वं विध्यंशमादाय त्वप्राप्तविभाषात्वं फलितं भवति । असंभावः । यदि प्रथमलिंगग्रहणं चेत्तत्र भूतमव्ययवस्त्रीविषयत्वमादाय
ङिति ह्रस्वश्चेत्यस्य प्रवृत्तिस्तदा तिश्रियै ब्राह्मण्यै इत्यत्रापि नदीत्वविकल्पः स्यादिति समुदायस्त्रीविषयत्वमादायैव तस्य प्रवृत्तिर्वक्तव्या एवं च प्रथमलिंगग्रहणं चेत्यस्या
प्रवृत्तिर्यद्यपि फलतः संपद्यते तथापि नित्यस्त्रीत्वस्य हाश्रयणे । तिश्रियै ब्राह्मण्यै इत्यत्र नदीत्वेन स्यादिति स्त्रीवाचकाविशेषतावच्छेदकमात्रं स्त्र्याख्यपदेन विवक्ष्यत इति । केनापीति
स्त्र्याख्याविति अनेन विध्येनेयङुवङ्स्थानेन निषेध्यस्य चेत्यर्थः । विधिविकल्प एवेति । दीर्घान्नोऽपि क्वचित् नेयङिति निषेधात् । क्वचित्त्वतो मास्ये ह्रस्वांशे च सर्वत्रैव मा भासेः प
क्षेऽप्यवतीत्येवं रूपा विधिविकल्पा या नदीसंज्ञोक्तास इति सूत्रस्य ग्रन्थे दर्शितमित्यर्थः ह्रस्वयोग्रहणपक्षोपपादनेऽपि इति । नदीसंज्ञायां ह्रस्वयोग्रहणे बहुव्रीहौ कृदिकारादित्येकमात्रं स्यात् स्त्र्याख्यो

श्रिति

नदीनेयङुवङ्स्थानावस्त्रीवामीत्येतदुत्तरं ङितीति विभक्तेयोगेनेयङुवङ्स्थानावस्त्रीवा नदीत्यनुवृत्त्या निषेधविकल्पमुक्त्वा ततो ह्रस्वादिति योगांतरे नेयङुवङ्स्थानौ वेति निवर्त्यय
स्त्र्याख्यौ ङितिनदीत्यनुवर्त्य ङित्येवयणस्थौ न दीत्येवं नियमे दोषाभावात् तेस्यप्रस्तस्योपपादनं भवति।।तत्तु चिंत्यमिति। उक्तव्याख्यानात् कुट्यै भ्रुवे ब्राह्मण्ये इत्यादौ नदीत्वविकल्पवारणेपि प्रमा
णाभावात् तदसंगतेस्तदाह। भाष्यात्तदलाभादिति। भाष्ये हि प्रवृत्तौ च प्राक्प्रवृत्तेः स्त्रीवचनायेवेत्यनावदुक्तेर्नित्यस्त्रीलिंगावित्यनुक्तेश्च तत्रास्तदलाभः नापि निषेधविकल्पपरभाष्यात्तल्लाभः
एकदेशमुक्तिस्त्वस्य प्रागावेदितत्वात् [illegible] च स्तुतस्तुश्रिये श्रिये इत्यादौ नेयङिति निषेधात् कटप्रुवे कटप्रुवे इत्यादौ नित्यस्त्रीत्वाभावादप्राप्तोपक्षे भवतीत्येवं विधिविकल्पसंभवेपि निषेधाश्रव
णीयांसो भवतीति भाष्यात् कन्याया लकटप्रुवे इत्यादौ चारितार्थ्यो नेयङुवङिति स्थानेनेतद्बाधापत्तिरतो नेत्यनुवर्त्य वाक्यभेदेन निषेधं बाधित्वा वेत्यनुवृत्त्या प्राप्ताप्राप्तविभाषान्यायेन विक
ल्प इति सूचनाय नेत्यनुवृत्तिरिति भावः। चे चा ब्राह्मणान्पद्मेपसारम्य पुंस्त्वे वाच्ये नत्वमित्यर्थादिसंतस्य त्येवंभूतान्वयस्यैवमित्यादिनान्वेयरत्वेति न च वाच्यमिसन्वयः कर्तव्यः। श्रियै ब्रा
ह्मणायेत्यादि स्विति। आदिग्रहणात् कटप्रुवे ब्राह्मणायेत्येतत्। लुबंतस्य तु शाकटिशाद्धस्य युक्तं वद्धावादुक्तरीत्या नदीत्वविकल्पस्य प्यत्तावा अत्रवदंति। शाकटिशाद्धय्यादेक्ययंजंतात्स्विपुंस्त्रिय
तात्तर्हि दीर्घापत्तिः। अथाचारक्विबंतात् क्विपु क्रियते एयमपि तु गोपतिः आगमशासनमनित्यमिति तु स्वमते नांगीकृतमिति चिंत्यमेतत्। [illegible] शाकट्ये अति शाकट्यै ब्राह्मण्ये कमाभूत् शाक
ट्येति शाकट्ये ब्राह्मणायेति भाष्ये शाकट्ये शाकट्ये इत्यनयोरुपादनस्य किं तात्पर्यं। अत्र ब्रूमः। अतिशाकट्ये ब्राह्मण्ये इत्यत्र वृत्ते ब्राह्मणी बोधिकायाः स्त्रीत्वान्नदीत्वे तदवयवस्यापि शा
कटिशब्दस्य नदीत्वसूचनाय शाकट्ये ब्राह्मण्ये कमाभूत्। इति। तथाति शाकट्ये ब्राह्मणायेत्यत्र वृत्ते ब्राह्मणबोधिकायाः पुंस्त्वान्नदीत्वाभावे तदवयवस्य सत्यपि स्त्रीत्वे नदीत्वाभावसूच
नाय शाकट्ये इत्युक्तिरिति। ध्योर्ह्रस्वाधिति। सावर्ण्ये षष्ठ्यर्थः। एतत्सर्वं वामीत्यत्रापीति। नेयङुवङिति निषेधे प्राप्ते पक्षे भवतीत्येवमप्राप्तविभाषारूपेण विधिविकल्प इयङुवङन्तस्यांग
स्येयङुवङ्विशेषणत्वे स्त्र्याख्याविति स्य योर्विशेषणत्वमित्यत्र सर्वमित्यर्थः। तत्फलं त्वति श्रीणां ब्राह्मणानामित्यादौ नदीत्वविकल्पो भवतीत्याहुः। त्रिभाष्ये इति। तिसृणां भार्याणामस्येति
न समासः। समानाधिकरणलक्षणपुंवद्भावेऽविद्यमानधर्मविरुद्धत्वाश्रयकार्याभावात्तत एव तिसृभावानापत्तेश्च आह। तृतीयां तेन समास इति। भार्याशब्दस्य संख्याशब्देन
क्रियावाचित्वाभावात् कर्तृकरणे कृतेति समासो न प्राप्नोतीत्यत आह। भार्या भरणीय इति। त्रैः ह्रस्वो ण्य इति ण्यत्। एवमपि भृञो संज्ञायामिति क्यपा भाव्यमिति चिंत्यमेतत्। तस्मा ·तिभावः
३८ दिवक्रर्तिप्रत्युदाहार्यः। तिसृभिरंध्यते सेव्यते इति हि तत्र विग्रहः। तिस्रो देव्यो यदा चैनं भजंते भुवनेश्वरं द्यावापृथिव्यौ चैव श्चैवकृत्स्नेन संस्मृतः इति महाभारते। अपूर्वशब्देन द्यावा
पृथिव्योरन्यस्तृतीयो ध्रुलोकः। तैः सेव्यमान इत्यर्थः। तदेतद्भुवनेश्वरमित्यनेन व्याख्यातं। असंगतिः स्पष्टैवेति। केचित्तु तेरंगत्वाच्चयादेशात्तत्र नास्ति स्वभावे लक्ष्ये लक्षणस्येति न्याया

[illegible]: विभर्ते धेनुं धत्ते [illegible] स्याः [illegible] भाववायथतो [illegible] स्य गीति
[illegible] स्याद [illegible]

न्येयादेशस्य पुनरप्रवृत्तावस्य निषेधस्यासंगतत्वाभावात् ज्ञापकत्वाभावमाहुः। अपरे तु न्नयादेशस्य विभक्तिविशेषापेक्षत्वाद्विभक्तिसामान्यापेक्षनदीसंज्ञाभावमपेक्ष्य नास्यान्तरंगभाव इति प्राहुस्तन्मतं दूषय
ति। वस्तुत इति। निरूपयिष्याम इति। ततोऽप्याधिक्यजिज्ञासुभिः परिभाषेन्दुशेखरे निरूपितं द्रष्टव्यं। परिभाषाप्रदीपार्चिषि तु ऊस्वन द्यापद इति सूत्रभाष्योक्तदिशा कास्मत्यादामूङ रामूर्दृसामूत्रेय
व्यतिरेकिणः षष्ठीबहुवचनग्रहणस्यानेकसापकसाध्यत्वेन स्त्रीरूपार्थविशेषापेक्षनदीसभावादनन्त्यापेक्षत्वा न्नयोरेशस्य नास्यान्तरंगत्वा अत एव न्नयादेशं बाधित्वा परत्वान्नदीसभावे स
यूऊ इति न्यायेन न्नयादेशाभाव इति स्थानिवत्सूत्रे भाष्ये स्पष्टं। अर्थस्तत्र बहिरंगत्वेनाश्रीयत इति त्वयुक्तं। वर्णो वर्णेनेति सूत्रे कैयटमेधारयबहुव्रीह्योरन्तरंगबहिरंगभावविचारयता भाष्ये सूचिता
तदनाश्रयणात्। नापि विभक्तिसंज्ञामपि नदीसभावोऽपेक्षत इति तत्र न्नयादेशोऽन्त्यापेक्ष इति वाच्यं। सत्यं चैवं बहिरंगत्वस्यान्तरंगत्वान्नदीयनिमित्तबहिर्भूतनिमित्तकसंज्ञासद्भाव एव बुध
मित्याहतकैमानसिद्धत्वादित्यानादि निरूपितं तत्तत्रैवावधारणीयं। अनित्यत्वादिति। नाज्ञानेर्ये इत्यस्याः परिभाषाया अनाश्रयणादित्युक्तं। अनित्यत्वमस्याः सिद्धे वनाज्ञानन्तर्ये परिभाषे
त्यपि वदन्ति। भाष्यपाठादिति। ज्ञापकमप्यस्य ... ज्ञातिपदिकादिति सूत्रे लिंगविशिष्टपरिभाषाया अनित्यत्वफलं ... ग्रहणमेवेत्येकदेशोक्तिलोगलेति ... वार्तिके पुनर्ग्रहणं नघटी
ग्रहणात् लिंगविशिष्टपरिभाषाया अनित्यत्वकल्पनमिह ज्ञापकमित्यपरे। विस्तरस्तु परिभाषाप्रदीपार्चिषि द्रष्टव्यः। टिलोपयलोपाविति। उक्तसामर्थ्यादभस्यापि टेर्लोपः। लोपो व्योरिति
च यलोपः। टिलोपस्य स्थानिवत्त्वात्तु न भवति यलोपः तन्निषेधादिति बोध्यं। इत्यर्थेनेति। अस्त्रीत्यत्र स्त्रीशब्दस्तदर्थे लक्षणामपेक्ष्य तदन्तविधेना स्त्रीशब्दात् भिन्नह्रस्ववर्णान्ता
दित्यर्थे प्राप्ते रसंभवेऽपि विशेष्याभावात्तदन्तविधेरयोगादेवमुक्तं। न च स्त्रीति प्रसज्यप्रतिषेधे स्त्रीशब्दस्य ङितिविकल्पो नेत्यर्थे ङित्समस्याक्षिप्तागस्य विशेष्यसद्भावात्तदन्तस्यापि निषे
धः प्राप्नोतीति तत्राह प्रसज्यप्रतिषेधस्तु नेति वाक्यभेदापत्तेरिति। आदिना असमर्थसमासापत्तिसंग्रहः। पर्युदासपक्षे तु स्त्रीत्यस्य नञोऽकार्थीभावापन्नस्यागापेक्षत्वापेक्षसापेक्ष
न्त्र्योदुर्लभ इति बोध्यं। एवं तु स्त्रीशब्दे लक्षणासहितपर्युदासात्प्रागवाच्युद्धपर्युदासेऽपि अतिस्त्रीशब्दे ह्रस्वप्रयुक्तनदीत्वविकल्पसिद्धेः संबोधनानुरतेरुक्तिरभ्युपगम्यफलाभा
वप्रदर्शनपरेति बोध्यं। ... दुशेखरोक्त्याख्यैव न्यायसी। न च बहुव्रीहिविशिष्टबहुस्त्रीसुन्दरस्त्रीत्यादौ च समुदायस्य स्त्रीरूपत्वाभावादस्त्रीति निषेधाप्रवृत्तौ दीर्घनाप्यन्नदीत्ववि
कल्पः स्यादिति वाच्यं। इष्टापत्तेः। लक्षणारूपगौरवग्रस्तत्वेन प्रमाणान्तराभावाच्च पक्षान्तरपरिग्रहस्याशिथिलत्वादित्याहुः। अस्त्रीत्यस्येयङुवङ्स्थानावित्येतत्संबद्धस्यानुवृत्ता
वप्यतिस्त्रीशब्दस्येयङुवङ्स्थानत्वान्निषेधप्राप्तिमाशंक्याह नन्वितीति। तत्रेति। इयङुवङ्स्थानावित्येतद्धटितवाक्ये इत्यर्थः। स्पष्टार्थमिति। ईकारयकारोकारवकाराणां स्था
नेययोरित्यर्थे ह्रस्वकारोकारयोर्यकारवकारस्थानिनोः शब्दतो संज्ञावारणपरत्वात् ङ्यो आरणेस्य ... त्वादिति भावः। इति बहुव्रीहिरिति। व्यधिकरणपदो बहुव्रीहिरित्यर्थः।
अत एव मुग्धमार्कण्डेयश्रितुश्रियेति मुक्ताफलश्लोके मुग्धो मार्कण्डेयो यस्मिंस्तत्स्यान्निश्रीश्रीयेसमादिति व्यधिकरणपदो बहुव्रीहिर्नेयङुवङ्स्थानावस्त्रीति च दिति हैमा

द्विणाव्याख्यातोऽस्थानत्वाद्वोधिकरणसाधनः इयङुवङ्स्थानाविति षष्ठीसमासः अपिवदिति। ऋकारसाहचर्यैति। प्रियतिसेस्याद्यर्थं मृकारांशे वृत्तेः प्राऋस्यस्यावश्यकतया न त्स्यात्
चर्यान्न दोषोऽपि तथात्वमिति भावः कैयटस्तु चिंत्यमेवेति नत्वभुद्द इत्यर्थः प्राचीनोक्तभाष्यदूषणमनूद्य कैयटे न चिंत्यतामाह नोक्तरघुकृत्वा नुनोक्त
ऋस्य चिंताहेतोस्तत्र आपत्तात् इतिशेषइति पुंसि समुदायस्य वा पर्ववस्यापि स्त्रीवृत्तित्वाभावात् उऋरीत्येति सिद्धांतगरूपग्रहणादिति भा
ष्योक्तरीत्येत्यर्थः समुदायस्याप्राप्तेश्चेति स्त्रियांवृत्तित्वाभावादिति भावः नदंतशब्दानामिति ऋदंतनांतशब्दानामित्यर्थः बहुवचनमिति
ऋन्नाभ्यामिति द्विवचननिर्देशमात्रगौरवमित्यपि बोध्यं ऋन्नान्ङीविति समाहारद्वंद्वनिर्देशे लाघवमिति तु न ऋदंतान्नकारांतात्तु इत्यावर्णा
तात् अपि ङीबापत्तिसंदेहात् तत्रादंतात् टापा बाधनेपि आकारांतात् ङीपि दोषस्य त्वन्यत्र विस्तरः काव्येमुत्तइति यथात्र नदीसंज्ञानिषेधोन
प्रवर्तते तथोक्तं अभिधानं धातोस्तत्र वह्वादिलेनेति बह्वादिभ्यश्चेत्यत्रोत इति तु नानुवर्तते पद्धसंचस्यादीनामिकारांतानां गणे पाठात् गणेतु व

मा

र्षाभूशब्दस्य पाठोनोपलभ्यत इति चिंत्यमेतत् अमरग्रंथ आक्षेपात् पाठभ्रंशा वा त्वन्नमपेक्ष्य तु भुवश्चेत्यनेन ङीषः कल्पनेलघु छंदसीत्यस्यानुवृत्तेस्तत्र
सत्येपि छांदसत्वेपि क्वचित् भाषायां प्रयुज्यत इति न्यायाश्रयणात् प्रयोगसिद्धं र्विप्रस्तरकृत्वा दित्याह इत्यंजताः स्त्रीलिंगाः इतिदिगिति हिगर्थस्तेदुः
ऋखात्संबुद्धिरिति सूत्रे हल्ग्रहणानुवृत्त्यभावे कुंडशब्दात्संबुद्धौ अमादेशे अदः परस्य सकारलोपापत्तौ त्युपिचेति दीर्घे कुंडामिति प्राप्नोतीति भाष्योक्तमिति
छंदे पितुल्यन्यायादीर्घे सन्निपात परिभाषाया अप्रवृत्तिरभ्युपगंतव्येति प्रायोवाद इति अतएव संबंधमनुवर्तिष्यते इति भाष्यमुपादाय संबध्यत इति संबंधः कर्म
णि घञ् संवद्धमित्यर्थे इति कैयटेन व्याख्यातं विधानस्य सर्वथानाश्रयणेनेति उत्तराद्यर्थसंबंधिनीत्यर्थः इतरादिभ्यो या विहिता इत्येवं विधानस्यानाश्रयणादि
त्यर्थः वस्तुतस्तु इतरादिभ्यो या विहिता तस्य इतराद्यर्थो या विहितेत्यर्थः अर्थाद्विधानं च शब्दद्वारकं अर्थास्यरत्वाश्रयणेन तु तथाभूतार्थबोधकात् अतिकृतरपि सादे
अवयवात्पस्त्वादोषः स्यात् अतो विहितविशेषणमिति परमनिष्कर्षे तु विभक्तिविधाने ङ्क्रपोः ऋस्यसाकांक्षया ऽर्थस्य कारणत्वेनोपादानाद्विभक्तिविधाना

137

नि नुवादेन कार्येऽर्थस्यैवापादानसंयोग्यं जनिकर्तुः प्रकृतिरिति सूत्रात् तस्य कारणत्वस्वरूपत्वादिति द्वारकल्पनापि मास्तु इत्थं च फलितोऽर्थो ऽन्तरार्थसंबंधिनीति लुक्परोपाध्या
यानामाशयः इति तदाशय इति वस्तुतस्त्वेवं सत्युपसर्जनप्रतिषेधारंभवार्तिकं तस्य व्याख्यानयोः फलभेदप्रसंगः विहितविशेषणे हि तस्मादित्युत्तरस्येत्यत्र लुक्तसं
स्कारानभ्युपगमो विहितपदाध्याहारश्चेति गौरवं महावार्तिके उक्तोपसर्जनप्रतिषेधफलत्वेनातिकृतरं इत्येतदुपन्यस्तं अतस्तन्मते तस्मादित्युत्तरस्येत्यत्र लुक्तसंस्कारा
त्॥ अगसंज्ञानिमित्तयोरुत्तरादिभ्यपरयोः स्वमोरदड् इति सूत्रार्थव्यवस्थापनास्य रमकतरदित्येवेष्यते ॥ नहि विरुद्धविभक्तिनिर्देशे सर्वत्र विहितविशेषणमेवेति नि
यमः युष्मदस्मद्भ्यां ङसोऽश् इत्यादौ व्यभिचारादिति प्रत्याख्यानपक्षेऽपि तथैवोचितमित्याहुः इत्यभिमानः इति अत्र पक्षे त्वं तदुक्तं भाष्यस्वरसस्तु अननुवृत्ताविति अ
न पक्षे त्लोकेपदादीनां प्रयोगो नानुपपन्नः शस्प्रभृतिष्विति नियमस्य छंदोविषयत्वात् आदेशपक्षनिराकरणेन भाष्यमते प्रवृत्त्यन्तरपक्षस्यैव व्यवस्थापनात् ननु
स्यस० श्रीपक्षानवदिसनुपपन्नं श्रीपाणीत्यादौ एकाऽनुत्तरपदे निर्णीतत्वत विशेषत्वात् आह दीर्घात्तव्यप्रयुक्त इति उक्तव्याख्याने फलमाह श्रीपाणीत्यादाविति चिंत्यप्र
योजनमिति चिंताबीजं नपुंसकवत्ते रिदम्शब्दात् अधुना प्रत्ययेद्रष्टादेशेन नुमापत्तौ यस्येति लोपेन स्यादित्याहुः भाषितः पुमान् येन शब्देनेति अर्थभेदेऽपि शब्दै
क्यमिति मतेनेदं अतद्गुणसंविज्ञानबहुव्रीहिः पुंवाचकस्य क्लीववृत्तित्वाभावात् यद्वा येनेत्यस्य व्यक्तानीये नेत्यर्थः समानानुपूर्वीकेणेति यावत् इति ब
हुव्रीहिरिति ननु प्रवृत्तिनिवृत्तिरूपान्यपदार्थन बहुव्रीहेरर्थः आद्यचायै येन शब्देन यस्मिन् प्रवृत्तिनिमित्ते पुमान् भाषितः तत्प्रवृत्तिनिमित्तके क्लीववृत्तिः शब्दः पुंवदि
ति सूत्रार्थः तत्र यद्यर्थभेदे शब्दैक्यमभ्युपगमस्तदा तिव्याप्तिस्तदवस्थैव मित्याशंक्यार्थभेदाच्छब्दभेदाश्रयणेन समाधानमाह भाषणक्रियायैत्यादि समानानुपूर्वी
कः समानार्थश्चेति अत्र समानानुपूर्वीकः इत्येतावतैव प्रघुशब्दे पुंवद्भावव्यावृत्तिसिद्धेस्तदितरोपादाने चिंत्यप्रयोजनं वस्तुतस्तु प्रवृत्तिनिमित्तवाचिभाषितपुंस्क
शब्दात् अत्र आद्यचा क्लीबवाचिशब्दो नाभिधीयते किंतु प्रवृत्तिनिमित्ताश्रयः क्लीवरूपोऽर्थ एवाभिधीयते अर्थबोधक नपुंसकपदे न सामानाधिकरण्यात् ॥

के

तच्च तृतीयादिषु विपरे इगन्तांगस्य वाच्यभाषितपुंस्कं नपुंसकं पुंवदिति सूत्रार्थ इति भाष्यप्रदीपयोः स्पष्टम्। एवं च भाषितः पुमानर्थो येनेति भाषणक्रियायाः करणाकांक्षायां स्यात्
तृतीयादिविभक्त्यपेक्षया पौर्वापर्ये तदिगन्तांगमेव संबध्यते प्रत्यासत्तेरित्यर्थभेदः। द्वयोरपि पीलुशब्दे नातिप्रसंगो न वा प्रथुशब्दे पातित इति। अतो दानेनु दानेनेति। हन्तेर्धातो
रित्यतो दातविधानादनुनासिक~~विधानाल्~~लोपार्थमनुदात्तत्वप्रतिज्ञानादुपदेशेऽनुदात्तत्वाच्चेति बोध्यम्। इति दिगिति। अयं च दिगर्थः परिभाषाप्रदीपाविषि विस्तरे
ण निरूपितः। लिंगासिद्धत्वात् यामधुसंबंधस्य क्षीरसमवायरूपस्यैव सामर्थ्यलभ्यत्वादेव मुक्तम्। क्षीरत्वाच्चिनपुंसकमधुशब्दाभिप्रायेणेति। पुंवृत्तिप्रवृत्तिनि
मित्तस्य मकारत्वादेः क्षीररूपेऽर्थे वार्थे सत्त्वाप्रवृत्तिनिमित्तैक्यभाषितपुंस्कत्वाभावात् पुंवद्भावाप्राप्तेरिहिलिंगव्यत्ययोदाहरणत्वसंगतिरित्युक्ताभिप्राय
वर्णनस्याभिप्रायः। नित्यत्वादेव नुम् सिद्ध इति। तन्वद्भावस्तु न नित्यः। अंगस्य तु नुमि कृते तदवयवस्य निर्दिश्यमानक्रोष्टुशब्दस्य नुमा व्यवधानादप्रसंगा
द्दितात नकृत इति अस्य तन्वत्प्राप्तेरित्यनेनान्वयः। तत्र हेतुः नुमि कृतेऽपीति नान्वेव निर्दिष्टपरिभाषाया अप्रवृत्तौ को हेतुरित्यत आह। सत्येव षष्ठीनिर्देशाभावादि
दितात न क्रोष्टुरिति प्रथमानिर्देशादिति भावः। एवं तु परमक्रोष्टुशब्दे तदंतत्वन्वद्भावप्रसंग इति श्रीवक्षभट्टाः। अत्र केचिदिष्टापत्तिमभिधाय प्रतिविदधति। वस्तुत
स्तु षष्ठिसूत्रे भाष्यप्रदीपयोः तत्र शास्त्रार्थतः षष्ठीनिर्देशेऽपि निर्दिश्यमानपरिभाषाप्रवृत्तेः संभवात् क्रोष्टुरिति षष्ठीपक्षे सूत्रतश्च तथात्वादिष्टापत्तौ प्रमाणाभावाच्चिंत्यमे
वेदमिति दिक्। नुम् तु न नित्यः। शब्दान्तरप्राप्तेस्तत्परत्वात् तन्वद्भावे प्राप्तपूर्वविप्रतिषेधानुमनानचानिर्दिश्यमानस्य क्रोष्टुविभक्त्योरानन्तर्यविघाताच्च तन्वद्भावस्य
पुनः प्रसंगाभावात्सकृद्गतिन्याय एवेदं विषयव्यवस्थापकः। एतच्च सर्वं शेषपूरणपक्षाभिप्रायेण तन्वत्प्राप्तेरित्यस्मात् प्रथान्तथाभूतस्यैव सकृद्गतिन्यायान्न पुन
स्तन्वत्वमिति ग्रंथस्य लेखनात् सूचितम्। एतेनाचश्चेति सूत्रप्रदीपात् दिङ्गाप्रथमप्रवृत्तसंस्कारवैयर्थ्यसंपादको यत्र द्वितीयसंस्कारस्तत्र पुनः प्रसंगविज्ञा
नानंगीकारान्नुमवैयर्थ्यसंपादकस्य तन्वत्वस्य सकृद्गतिन्यायाश्रयणेनाप्रवृत्तिसाधनं चिंत्यमित्यपास्तम्। सर्वथा पुनः प्रसंगविज्ञानाभावे सकृद्गतिन्या
यस्यैव व्यवस्थापकत्वेन तथात्वात् यद्वा तु तेनापि शेषपूरणेनैव संग्राह्यत्वात्। यद्वा विभक्तावित्यस्यांगविशेषणत्वात् क्रोष्टुशब्दस्य विभक्त्यानन्तर्यवि
घाते सत्यपि तन्वत्प्रवृत्तेरप्रतिबंधादुभयोरपि नित्यत्वात् पूर्वविप्रतिषेधान्नुमि तन्वत्वस्याप्रवृत्तौ सकृद्गतिन्यायाश्रयणेन साध्ये इत्यत आह। सकृद्

(margin, left of line 8:) १८

(margin, right of line 9:) इर्यमान

७१

त्तिन्यायान्नेति। एतदपि शेषपूरणसापेक्षं ग्रन्थलेखनाद्ग्रन्थकृदुक्तस्यानारूढमिति प्रतिभाति। निर्द्धारणस्यानेकविषयत्वादाह। सोत्रमेकवचनमिति। आत्वे कृतेनु
ऽनापत्तेरिति। न च पूर्वस्मादपि विधौ स्थानिवद्भावान्नुडनापत्तिरसिद्धेति वाच्यम्। अस्थानिभूतादच: पूर्वस्मान्निमित्तत्वेनाश्रितात्परस्य विधौ स्थानिवद्भावद्
स्येव प्रदीपकृद्व्यवस्थापितत्वेन नुडनापत्तिरित्याशयात्। दीर्घेण विनाशावश्यकत्वेनेति। अत एवेङ्ह्रस्वात्संबुद्धेरिति सूत्रे हल्ग्रहणानुवृत्त्यभावे सोरमादेशो
आदे: परस्येत्यकारलोपे सुपि चेति दीर्घे हे कुडामिति स्यादिति भाष्ये उक्तमित्याशय:। माधवास्त्वायमाहुरिति। अत्रास्वरसबीजं नामीति सूत्रव्याख्यानावस
रे उपपादितं। समुदितप्रातिपदिकापेक्षेति। क्विपूर्वविशिष्टस्य प्रातिपदिकत्वात्तदपेक्षह्रस्वस्यापि तदनन्तरस्वमात्रापेक्षत्वकमपेक्ष्य बहिरंगत्वमित्यर्थ: त
दाह। वर्णमात्राश्रय इति। यद्यपि कृत्प्रत्ययेण प्रकृतेराक्षेपात्स्वांतप्रकृतेस्तुग्विधीयत इति मतं तदाभाभ्यां समुदायाश्रयणेपि ह्रस्वस्य कृद्विरूपार्थसा
पेक्षत्वाद्बहिरंगत्वमिति बोध्यं। स्पष्टं चेदं सूत्रे भगवत इत्यत्र प्रदीपे। न प्रत्यय: संनिपातलक्षण इति। अकारान्तप्रकृतिसंनिपातनिमित्तप्रत्ययस्य तन्निमित
कत्वाभावादिति भाव:। अंगसंज्ञा ताहीति। तस्या: प्रकृतिप्रत्ययसंनिपातनिमित्तकत्वादिति भाव:। अनिमित्तं स्यादिति। प्रकृतिप्रत्ययविघातकस्यानि
मित्तं स्यादित्यर्थ:। अन्यत्र निरूपितं। अत्रारुचिबीजं तु उक्तभाष्ये एकदेश्युक्तित्वे प्रमाणाभाव:। शिवादीत्यत्रांगसंज्ञाया लोपानिमित्तत्वापादनेन तु दाक्षि
रित्यत्र प्रत्ययस्य तदनिमित्तत्वापादनेन तुल्यं। सामर्थ्याद्गोवर्णविचारोऽभाविष्यतीति प्रदीपकृदुक्तप्रतिविधानमपि तत्र तुल्यं। अत्र तु शिवादीत्यत्र च रि
त्तार्थस्य लोपस्य दाक्षिरित्यत्राकारान्तप्रकृत्युपजीवकत्वेन निमित्तं न स्यादिति तत्र प्रतिविधानान्तरमास्थेयं स्यादित्याहु:। इत्यलमिति। स्वरूपव्याक्रियया
पराकर्तव्यस्य मतस्य तावत्येव पराकरणे समर्थत्वात्। नानोपधिकापेक्षितेत्यर्थ:। तथा हि। ह्रस्वस्य पिति कृति तुगिति सूत्रेंतरंगपरिभाषाया: सामान्येनाप्रवृ
त्तिरुक्तभाष्ये एकदेश्युक्तिकल्पनागौरवपरास्तं। ग्रामणिकुलमित्यत्र तुग्वारणपरं भाष्यमेव त्वेकदेश्युक्ति:। ग्रामणिच्छत्रमित्यत्र तुगभावप्रसंगादिति
स्पष्टं प्रदीपे। षत्वतुकोरसिद्ध इत्यसिद्धत्ववचनाच्चाजानन्तर्ये परिभाषालाप्यतेरिति तु भाष्यादिग्रन्थप्रसिद्धो घंटापथ:। ननु तुग्विधावजानन्तर्यमाश्रि
तमिति बहिरंगासिद्धत्वेन समाधानपरभाष्यविरोधापत्तात्तत्रैकदेश्युक्तित्वकल्पनागौरवमेवमपि तुल्यमिति वाच्यं। बहिरंगशास्त्रेऽपातोयोचेत्

संनिपातपरिभाषया

१७

न्य

स्यातरंगशास्त्रे आनंतर्याश्रयणेनानंतर्यस्य कार्यैकत्वे बहिरंगासिद्धत्वं नेति परिभाषार्थव्यवस्थापनात् बहिरंगशास्त्रे उपात्तस्य चो[illegible]स्वस्यांतरंगशास्त्रे तु
ग्विधौ पित्सदानंतर्याश्रयणेऽपि तदन्यस्य तु कोविधानाभावात् परिभाषाप्रवृत्तेरभावात् बहिरंगशास्त्रे उपात्तस्य चांतरंगशास्त्रे आनंतर्याश्रयणं क्वचित् साक्षात्
यथा अक्षद्यूस्त्वक्षद्यूरिति बहिरंगशास्त्रे उपात्तस्य च ऊठ्रूपस्यांतरंगशास्त्रे इकोयणचीत्यत्र क्वचित् स्थानिद्वारा यथा अक्षद्यूरित्यत्रैवांतरंगे वलोलोपे ऊठ्स्थानिनो वकारस्य
क्रोशिचदधीत्येतयोः स्थले कच्च बहिरंगे आद्गुणे उपात्तस्यैकादेशरूपस्य चानंतर्याश्रयणे तु तदन्यस्य फलं विधेयम् अन्यत्र च तथाभूतस्यैकादेशस्य च । पित्सदानंतर्याश्रयणे
नासिद्धत्वनत्वात् तंदस्य ह्रस्वबुध्यागृहीतस्य लुग्विधेय उ इति परिभाषाप्रवृत्त्या षत्वतुकोरसिद्धत्वस्य स्वभाष्योक्तत्वज्ञापकत्वज्ञापिते सति चारितार्थ्यं च नानुपपन्नं एवं च कृति तुग्
ग्रा॰ ग्रहणस्य वैयर्थ्यशंकापि नास्ति संनिपातपरिभाषाया अनित्यत्वे तज्ज्ञापकं भवत् मुनिच्छत्रमित्यत्र तुगर्थमित्याद्यधिकं जिज्ञासुभिः परिभाषाप्रदीपार्चिर्दृष्टव्यः ॥ ह्रस्वजंतान
